# कक्षा – द्वादशी

## संस्कृतम् (ऐच्छिकम्) कोड सङ्ख्या - 022

## अङ्कयोजना उत्तरसङ्केताश्च - 2023-24

**समयः – होरात्रयम्** | **पूर्णाङ्काः – 80**

**अवधातव्यम् -**

1. अस्याम् अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि शुद्धानि, तेषां मूल्याङ्कनं करणीयम्।
3. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरदान-समये समुचितानां विभक्तीनां वचनानां प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. 'ख' खण्डे (रचनात्मक-कार्ये) वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।
7. **प्रश्ननिर्माणस्य प्रश्ने ½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय। परं सम्यक्-प्रश्ननिर्माणं तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः।**

## खण्डः - 'क'

### अपठित-अवबोधनम् 10 अङ्काः

| | | |
|---|---|---|
| 1. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –<br>(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)<br>(क) लक्ष्मीः<br>(ख) परिश्रमस्य<br>(ग) छात्रजीवने | 10<br>1×2=2 |
| | (आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)<br>(क) मनोवाञ्छितं लक्ष्यं साधयितुं मनः इन्द्रियाणि च संयम्य निरन्तरं परिश्रमः आवश्यकः भवति। | 2×2=4 |

| | | |
|---|---|---|
| | (ख) ये छात्राः नियमपूर्वकं परिश्रमेण पाठं पठन्ति स्मरन्ति च ते सदा परीक्षायां सफलाः भवन्ति।<br>(ग) परिश्रमिणः जनाः केवलम् आत्मन एव उन्नतिं विकासं च न कुर्वन्ति अपितु समाजस्य राष्ट्रस्य चापि उत्थानं कुर्वन्ति। | |
| | (इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत-<br>उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः/ उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः/ परिश्रमस्य महत्त्वम् | 1 |
| | (ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्)<br>(क) (iv) उद्यमेन<br>(ख) (iii) जनाः<br>(ग) (i) उद्योगिनम्<br>(घ) (ii) छात्रः | 1×3=3 |
| | | |
| | **खण्डः - 'ख'**<br>**रचनात्मक–कार्यम्** **10 अङ्काः** | |
| 2. | भवतः विद्यालयस्य शिक्षकाः शैक्षिकभ्रमणाय छात्रान् हरिद्वारस्थितं पतञ्जलियोगपीठं नेष्यन्ति। भवानपि तत्र गन्तुम् इच्छति। एतदर्थम् अनुमतिं धनञ्च प्राप्तुं पितरं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत।<br>छात्राः पूर्णं पत्रं लेखिष्यन्ति। शुद्धपत्राय पूर्णाङ्काः प्रदेयाः। व्याकरणसम्बद्ध–दोषेभ्यः आंशिकरूपेणैव अङ्काः कर्तनीयाः न तु पूर्णाः।<br>**अथवा**<br>स्वक्षेत्रस्य नगरनिगमाधिकारिणं प्रति पत्रं लिखित्वा निवेदयतु यत् भवतां क्षेत्रे मार्गेषु रथ्यासु च सर्वत्र अस्वच्छता व्याप्ता अस्ति। अनेन कारणेन क्षेत्रवासिनः महत्कष्टम् अनुभवन्ति। रोगाणाम् अपि आशङ्का वर्तते। कृपया अस्मिन् विषये विशिष्टं ध्यानं दत्वा यथाशीघ्रं स्वच्छतायाः व्यवस्थां कारयतु। | 1×5=5 |
| | | |
| 3. | प्रदत्ततथ्यानां सहातया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत –<br>विषयम् आधृत्य छात्राः सरलम् अनुच्छेदं लेखिष्यन्ति। विषयसम्बद्धतायै 2½ अङ्काः भाषिकशुद्धतायै च 2½ अङ्काः दातव्याः।<br>**अथवा**<br>हिन्दीभाषया आङ्ग्लभाषया वा लिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत।<br>1. संस्कृतभाषायाः साहित्यम् अत्यन्तं विशालम् अस्ति।<br>2. महर्षिः वाल्मीकिः रामायणस्य रचनाम् अकरोत् / रामायणम् अरचयत्। | 5 |

| | | |
|---|---|---|
| | 3. सर्वे जनाः सुखिनः रोगरहिताः / निरामयाः च भवन्तु।<br>4. उत्तमस्वास्थ्याय सर्वे योगाभ्यासं कुर्युः।<br>5. पर्यावरणस्य सुरक्षा सर्वेषां भारतीयानां कर्तव्यम् अस्ति।<br>6. वयं संस्कृतस्य प्रचारं करिष्यामः।<br>7. ह्यः भवन्तः कुत्र अगच्छन्? | |
| | | |
| | **खण्डः - 'ग'**<br>**अनुप्रयुक्त–व्याकरणम्        15 अङ्काः** | |
| | | |
| 4. | अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) राज्यं कर्तुम्<br>(ख) एभिः + नीतः<br>(ग) तिष्ठति + अकर्मकृत्<br>(घ) पालिताश्च | 1×3=3 |
| | | |
| 5. | रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) (iii) कृ+तव्यत्<br>(ख) (ii) कलापी<br>(ग) (i) अक्षत्रिय + टाप्<br>(घ) (iii) कुर्वन् | 1×3=3 |
| | | |
| 6. | मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) अद्य<br>(ख) भूयः<br>(ग) नूनम्<br>(घ) उच्चैः | 1×3=3 |
| | | |
| 7. | कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)<br>(क) निजकार्यात्<br>(ख) दानभोगम् / दानभोगैः<br>(ग) तुभ्यम् | 1×3=3 |

| | | |
|---|---|---|
| | (घ) गमनात् | |
| | | |
| 8. | अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समासं वा चित्वा लिखन्तु।<br>(केवलं प्रश्नत्रयम्)<br>(क) (ii) वरतन्तुशिष्यः<br>(ख) (i) तपः एव धनं यस्य तम्<br>(ग) (iv) सविनयम्<br>(घ) (iii) सुकृतं च दुष्कृतं च | 1×3=3 |
| | | |
| | **खण्डः - (घ)**<br>**(I) पठितावबोधनम् 25 अङ्काः** | |
| | | |
| 9. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) उज्जयिनीम्<br>(ii) ब्राह्मणः<br>(iii) यज्ञदक्षिणाकालम्<br>(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम् )<br>(i) ब्राह्मणस्य पुत्रेणोक्तं 'यद्रत्नं चतुरङ्गबलं ददाति तद्ग्रहीष्यामः यतः सुखेन राज्यं कर्तुमर्हिष्यामः' इति।<br>(ii) राजावभृथस्नानं कृत्वा सर्वानर्थिजनान् परिपूर्णमनोरथानकरोत्।<br>(iii) राजा यदा ब्राह्मणं यथेच्छं रत्नमेकं ग्रहीतुमकथयत् तदा ब्राह्मणेनोक्तं 'गृहं गत्वा गृहिणीं, पुत्रं, स्नुषां च पृष्ट्वा सर्वेभ्यो यद्रोचते तद्ग्रहीष्यामीति।<br>(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) राजा<br>(ii) अर्थिजनान्<br>(iii) स्नुषाम् | 5<br>½x2=1<br><br><br><br>1x2=2<br><br><br><br><br><br>1x2=2 |
| | | |
| 10. | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) श्रुतपारदृश्वा<br>(ii) गुर्वर्थम्<br>(iii) परीवादस्य | 5<br>½x2=1 |

| | | |
|---|---|---|
| | (आ) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नद्वयम् )<br>(i) कौत्सः रघोः सकाशात् वदान्यान्तरं गन्तुं शक्नोति।<br>(ii) परीवादः राज्ञः / रघोः भवितुं शक्नोति।<br>(iii) अर्थी यदि रघोः सकाशात् कामम् अनवाप्य गमिष्यति तदा रघोः परीवादनवावतारः भविष्यति?<br>(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) श्रुतपारदृश्वा<br>(ii) अयम्<br>(iii) वदान्यान्तरम् | 1×2=2<br><br><br><br>1×2=2 |
| | | |
| 11. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) बटवः<br>(ii) नहि<br>(iii) बटुभिः<br>(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) लवः आत्मानं भगवतः सुगृहीतनामधेयस्य वाल्मीकेः पुत्रं जानाति।<br>(ii) पशुसमाम्नाये 'अश्वोऽश्व' इति नाम पठ्यते।<br>(iii) बटुभिः भूतविशेषः जनपदेषु अनुश्रूयते।<br>(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) प्रविश्य<br>(ii) कथय<br>(iii) वाल्मीकेः | 5<br>½×2=1<br><br><br><br>1×2=2<br><br><br><br>1×2=2 |
| | | |
| 12. | अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्)<br>(क) कुत्र ..... ?<br>(ख) कान् ...... ?<br>(ग) कः ........ ?<br>(घ) काम्/किम् ....... ?<br>(ङ) किम् / कानि ..... ? | 1×4=4 |
| | | |
| 13. | अधोलिखितस्य श्लोकस्य अन्वयं लिखत।<br>**अन्वयः** – (नरः) इह कर्माणि कुर्वन् एव शतं समाः जिजीविषेत्। एवं त्वयि नरे कर्म न लिप्यते, इतः अन्यथा न अस्ति। | 3 |

| | | |
|---|---|---|
| | | |
| 14. | **अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत।**<br>छात्राः श्लोकस्य भावार्थं संस्कृतेन स्वयं लेखिष्यन्ति। समुचितभावार्थाय पूर्णाः अङ्काः प्रदेयाः।<br>व्याकरणिकाशुद्धीनां कृते आंशिकरूपेण अङ्काः कर्तनीयाः।<br>**अथवा**<br>'कार्यं वा साधयेयम्, देहं वा पातयेयम्' इति पाठम् आधृत्य शिववीरचरस्य चरित्रचित्रणं छात्राः सङ्क्षेपेण संस्कृतभाषया लेखिष्यन्ति। समुचिततथ्यानां कृते पूर्णाः अङ्काः प्रदेयाः।<br>व्याकरणिकाशुद्धीनां कृते आंशिकरूपेण अङ्काः कर्तनीयाः। | 3 |
| | | |
| | **खण्डः - (घ)**<br>**(II) संस्कृत–साहित्येतिहासस्य सामान्यः परिचयः 10 अङ्काः** | |
| | | |
| 15. | **अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)**<br>(क) (ii) अष्ट<br>(ख) (iii) अश्वघोषः<br>(ग) (i) राजतरंगिणी<br>(घ) (iv) विक्रमादित्यस्य | 1×3=3 |
| | | |
| 16. | **प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)**<br>(क) (iii) गद्यम्<br>(ख) (ii) कादम्बर्याः :<br>(ग) (iii) गद्य-पद्यात्मकम्<br>(घ) (i) अनन्तभट्टेन | 1×3=3 |
| | | |
| 17. | **प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)**<br>(क) (ii) गीतम्<br>(ख) (iv) मुद्राराक्षसम्<br>(ग) (i) हर्षः<br>(घ) (iii) उत्तररामचरिते<br>(ङ) (iii) अग्निमित्रः | 1×4=4 |
| | | |

| | | |
|---|---|---|
| | **खण्डः -'ङ'**<br>**छन्दोऽलङ्कारपरिचयः - 10 अङ्काः** | |
| | | |
| 18. | (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) मम हि पितृभिरस्य प्रस्तुतो ज्ञातिभेद-<br>स्तदिह मयि तु दोषो वक्तृभिः पातनीयः।<br>अथ च मम स पुत्रः पाण्डवानां तु पश्चात्<br>सति च कुलविरोधे नापराधयन्ति बालाः॥<br>(ख) वंशस्थस्य<br>(ग) III<br>(घ) अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।<br>इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम॥<br>(आ) अधोलिखतासु श्लोकपङ्क्तिषु प्रयुक्तं छन्दं परिचीय तस्य नाम लिखत। (केवलं प्रश्नद्वयम्)<br>(क) वसन्ततिलका<br>(ख) मालिनी<br>(ग) उपजातिः | 1×3=3<br><br><br><br><br><br><br><br><br>1×2=2 |
| | | |
| 19. | (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।<br>(ख) अनुप्रासः<br>(ग) रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः।<br>निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते॥<br>(घ) तद्रूपकमभेदो य उपमानोपमेययोः।<br>(आ) अधोलिखतासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत। (केवलं प्रश्नद्वयम्)<br>(क) उपमा<br>(ख) अनुप्रासः<br>(ग) रूपकम् | 1×3=3<br><br><br><br><br><br>1×2=2 |

**********************************